# संस्कृतवार्ता:

**दिनाङ्क :- 12/02/2025** **सायम् - 06:20**

**इयम् आकाशवाणी**

**सम्प्रति वार्ताः श्रूयन्ताम्**

**आदौ मुख्यवार्ताः**

- प्रधानमन्त्री श्रीनरेन्द्र-मोदी, फ्रांसस्य राष्ट्रपति: इमैनुएल मैक्रों वर्य: च भारत-फ्रांस-रणनीतिक-साहमत्यम् कृतवन्तौ। उभाभ्यामपि तत्र मार्सिले नगरे भारतस्य प्रथमस्य नूतन-वाणिज्य-दूतावासस्य संयुक्त-रूपेण कृतम् उद्घाटनम्।
- भारतस्य खुदरा इति विकीर्ण-मुद्रास्फीति: जनवरी मासे अपचीय प्रतिशतं दश-मलवोत्तर त्रि.एकाधिक मितम् आगतम्। यद्धि पञ्च-मासेषु निम्नतम: स्तर: वर्तते।
- अद्य माघ-पूर्णिमाया: शुभावसरे एकोन-षष्टि-लक्षाधिक-एक-कोटि-मिता: श्रद्धालव: त्रिवेणीसङ्गमे कृतवन्त: पुण्यावगाहनम्।
- पुरुष क्रिकेट क्रीडायां, भारतेन अहमदाबाद - क्रीडांगणे इंग्लैंड-दलं विरुध्य तिसृणां स्पर्धानाम् एकदिवसीय-श्रृंखलाया: अन्तिमे द्वन्द्वे सप्त-पञ्चाश-दुत्तर त्रि-शत-मित-धावानांकानां लक्ष्यम् उपस्थापितम्।
- बैडमिंटन क्रीडायां चीनस्य क्विंगदाओ मध्ये एशिया-मिश्रित-दलस्य चैम्पियनशिप इति विजेतृ-स्पर्धाया: प्रागुपान्त्यचक्रं प्राप्तम् भारतम्।

**------------------------------------**

**प्रधानमन्त्री-मार्सिले**

फ्रांस-देशस्य ऐतिहासिके मार्सिले नगरे प्रधानमन्त्रिणा श्रीमोदिना, फ्रांस-देशस्य राष्ट्रपतिना इमैनुएल मैक्रों इत्यमुना च संयुक्त-रूपेण प्रथम-भारतीय-वाणिज्य-दूतावासस्य कृतम् उद्घाटनम्। एतस्य वाणिज्य दूतावासस्य उद्घाटनं

फ्रांस देशस्य मार्सिले नगरे जातम् अस्ति। एतन्नगरं भारतस्य भविष्य-कालिक-परियोजना: निध्याय अतिशय महत्त्वपूर्णं वर्त्तते। ध्येयम् अस्ति यत् प्रधानमन्त्री मोदी फरवरी दशमी-त: फ्रांस देशस्य यात्रायां वर्त्तते। अद्य तस्य यात्राया: अन्तिमं दिनमस्ति। एतस्य पश्चात् प्रधानमन्त्री मोदी अमेरिकाया: द्वि-दिवसीय- यात्रायां गमिष्यति।

तत्र हि वाणिज्य-दूतावासस्य उद्घाटनात् प्राग् उभाभ्यामपि नेतृभ्यां नगरे भारतीय-प्रवासिभि: जनैः साकं सम्भाषणम् अपि आचरितम्। एताभ्यां **मजारग्यूज-युद्ध-भूमौ** प्रथमे द्वितीये च विश्व-युद्धे हुतिंगतेभ्य: भारतीय-सैनिकेभ्य:श्रद्धांजलयोSपि अर्पिता:। पेरिस-नगरे उच्च-स्तरीयाणाम् उपवेशनानां श्रृंखलाया: समापनानन्तरं श्रीमोदी फ्रांस देशीयो राष्ट्रपति: च अद्य प्रातः एव मार्सिले

नगरं प्राप्तवन्तौ आस्ताम्। मार्सिले नगरे भारतीय समुदायेन एतयोः आगमने अत्युत्साहेन उल्लासपूर्वकम् स्वागतीकरणं कृतम्। अतः पूर्वं भारत-फ्रांस-देशाभ्यां प्रधानमन्त्रिण: श्रीनरेन्द्र मोदिन: द्वि-दिवसीय-यात्राया: अवसरे स्वीय कार्य-नीतिक-साहमत्यमपि सुदृढीकृतम् अस्ति।अस्मिन् अवसरे देशद्वयेन प्रौद्योगिकी, नागरिक-परमाणु-ऊर्जा, पर्यावरण-स्थिरता, सांस्कृतिक-विनिमय-सन्निभेषु प्रकरणेषु महत्त्वपूर्णेषु साहमत्येषु हस्ताक्षराणि कृतानि।

एतै: साहमत्यै: भारत-फ्रांसयो: मध्ये रणनीतिक -सम्बन्धा: अतोऽपि दृढतरा: भविष्यन्ति। अथ च उभयो देशयो: मध्ये सहयोग-भावनापि वर्धिष्यते। द्विपक्षीय सम्भाषणावसरे, प्रधानमन्त्री मोदी राष्ट्रपति: मैक्रों च भारत-फ्रांस रणनीतिक-कार्यनीतिक-साहमत्यकृते स्वीयां सुदृढ-प्रतिबद्धतां प्रकटितवन्तौ।

एतस्य पश्चात् मार्सिले-नगरं सम्प्राप्य प्रतिनिधिमंडल-स्तरीया मन्त्रणा जाता। अत्रावसरे उभाभ्याम् अपि नेतृभ्यां व्यापार-निवेश-सम्बन्धानां वर्धनार्थम् अपि आह्वानं कृतम्। अस्य विषये चतुर्दश भारत-फ्रांस सीईओ फोरम इति समवायानां कार्यकार्य-धिकारिणां मञ्चस्य विवरणस्य अपि स्वागतं कृतम्। तत्र हि प्रधानमन्त्री श्रीनरेन्द्र मोदी पेरिसनगरे फ्रांसस्य राष्ट्रपतिना साकं भारत-फ्रांस-देशयो: 'सीईओ फोरम' इत्याख्यं मञ्चं समबोधयत्, प्रोक्तवान् च यत् भारतस्य व्यावसायानुकूला: नीतय: सप्त-चत्वारिंशदुत्तर-द्वि-सहस्र-तम-वर्ष-पर्यन्तं 'विकसित भारतमिति' लक्ष्यस्य प्राप्तये विकासं वर्धयितुं सन्ति तत्परा:।

------------------------------------

## मोदी-पिचई-मन्त्रणा

प्रधानमन्त्री श्रीनरेन्द्र मोदी प्रत्यपादयत् यत् भारतम् आर्टिफिशियल इंटेलीजेंस इति कृत्रिम-बुद्धिमत्ता-क्षेत्रे उल्लेखनीयां प्रगतिं करोति। श्रीमोदी विश्वस्य ए. आई. क्षेत्रस्य जनान् अध्यार्थयत् यत्ते भारते आगत्य निवेशं कुर्वन्तु, भारतस्य युवबले च विश्वासं कुर्वन्तु इति। प्रधानमन्त्रिणा पेरिस नगरे ए.आई. एक्शन समिट इत्याख्ये सम्मेलने गूगल-समवायस्य सी.ई.ओ. अधिकारिणा सुन्दर-पिचाई वर्येण साकं सम्भाषणानन्तरं एषा टिप्पणी कृता ।

श्री-पिचाई-वर्येण एतत्सम्भाषणं आशावर्धकं प्रतिपादितम्। सामाजिक-सञ्जालीये सन्देशे श्री पिचाई व्यलिखत् यत् मोदिना साकं मन्त्रणावसरे ए.आई. द्वारा भारते आनेष्यमाणानाम् अविश्वसनीयानाम् अवसरणां तेषां पद्धतीनां च विषये भृशं चर्चा जाता । येन भारतस्य डिजिटल-परिवर्तन-विषये सम्भूय कार्यं कर्तुं शक्येत।

------------------------------------

## भारत-मुद्रा-स्फीति:

भारतस्य खुदरा इति विकीर्ण-मुद्रास्फीति: जनवरी मासे अपचीय प्रतिशतं दश-मलवोत्तर त्रि.एकाधिक मितम् आगतम्। यद्धि पञ्च-मासेषु निम्नतम: स्तर: वर्तते। सांख्यिकी-कार्यक्रम-कार्यन्वयन-मन्त्रालयेन प्रकाशितस्य अङ्कत्रानुसारेण ग्रामीणक्षेत्रेषु

मुद्रास्फीतिः चत्वारि दशमलव षड् चत्वारि प्रतिशतं पञ्जीकृतम् अस्ति। तत्रैव नगरीयक्षेत्रेषु त्रीणि दशमलव अष्ट सप्त प्रतिशतं पंजीकृतम्।

------------------------------------

## साधोः रविदासस्य जन्म जयन्ती

अद्य अशेषेऽपि देशे संत रविदासस्य जन्म-जयन्ती महता हर्षोल्लासेन परिपाल्यते । संत रविदासस्य नाम पञ्चदश-शताब्द्याः भारतस्य महनीय-साधुषु, दर्शनशास्त्रिषु, कविषु समाज-सुधारकेषु च गण्यते। सन्त रविदासः निर्गुण-सम्प्रदायस्य नेतृत्वकर्ता प्रसिद्धः साधुः अवर्तत। उत्तर-भारतीय-भक्ति-आंदोलनमपि अमुना अग्रे नीतम् आसीत्। संत रविदासेन निज आध्यात्मिक-सामाजिक-संदेशानां माध्यमेन समाजे जागरुकता प्रसारणस्य कार्यं कृतम् आसीत्। अद्य अस्य जन्म जयन्त्यवसरे राष्ट्रपतिः, उपराष्ट्रपतिः, प्रधानमन्त्री च देशवासिभ्यः मङ्गलकामनाः वितरितवन्तः।

------------------------------------

## सत्येन्द्रदासस्य निधनम्

श्रीराम-जन्मभूमि-मन्दिरस्य मुख्यार्चकः सत्येन्द्रदास जी महाराजस्य साकेतवासः जातोस्ति। अद्य माघपूर्णिमायाः पवित्रदिनस्य प्रातः प्रायः सप्तवादने पीजीआई चिकित्सालये लखनऊनगरे अन्तिमः श्वासः गृहीतः। सत्येन्द्र-दासजी महाराजः त्रिणवत्युत्तर-एकोन-विंशतिः शत-तम-वर्षाद् श्रीरामलला-भगवतः सेवनं पूजनं च कुर्वन् आसीत्। श्रीरामजन्मभूमितीर्थक्षेत्रस्य महामन्त्री चम्पतरायः मन्दिरव्यवस्थासम्बद्धाः अन्ये जनाश्च मुख्यार्चकस्य देहावसाने गम्भीरा संवेदना व्यक्तीकृता अस्ति। सहैव अस्य निधनम् अभिलक्ष्य मुख्यमन्त्री योगी आदित्यनाथः एकस्मिन् सामाजिक सञ्जालीये संदेशे शोकं प्राकटयत् । अमुना प्रोक्तं यत् आचार्यः श्रीरामस्य महान् भक्तः आसीत्। प्रभुः श्रीरामः निज चरणयोः तस्मै चिर-स्थानं दद्यात् इति।

------------------------------------

## महाकुम्भ वार्ताः

माघपूर्णिमायाः शुभावसरे प्रत्यूषकालादेव अपार उत्साहेन श्रद्धया च साकं श्रद्धालवः पुण्यस्नानं कृत्वा मातुः गङ्गायाः पूजार्चनां कुर्वन्ति।

तत्र हि भारतस्य सनातनसंस्कृतेः परम्पराणां परिपालकाः कल्पवासिनः, श्रद्धालवः, दर्शनार्थिनः, पुण्यावगाहानार्थिनः चात्र भृशं एकत्रिताः सन्ति । शृण्वन्तु तावत् अस्माकं वार्ताहरस्य महाकुम्भ-विवरणम् -

***अद्य प्रयागराज-नगरस्य पुण्ये महाकुंभे माघपूर्णिमायाः स्नानस्य शुभावसरे साम्प्रतम् नव पञ्चाशल्लक्षाधिकैकसहस्रभक्ताः सङ्गमे पवित्रं स्नानम् अकुर्वन्। माघपूर्णियां गङ्गा, यमुना, सरस्वती इत्येतासां नदीनां***

*सङ्गमस्थाने स्नानम् शुभम् भवति इति मन्यते, अत एव स्नानस्य महती प्रासङ्गिकता अस्ति। अस्मिन् वर्षे दश लक्षतः अधिकाः कल्पवासिनः आयोजिते भव्योत्सवे महाकुम्भे कल्पवासस्य विशेषानुष्ठानस्य समाप्तिः अपि भवति। अद्यावधि प्रायः पंचपंचाशल्लक्षाधिकसप्तचत्वा रिंशत्कोटि संख्यकाः भक्ताः पवित्रं स्नानम् समाचरितवन्तः । विश्वस्य बृहत्तमः धार्मिकसमागमः इति मान्यतां प्राप्तम् महा-कुम्भ-मेलकं जनवरीमासस्य त्रयोदश दिनाङ्के आरब्धम्। इदं हि सम्पूर्ण-जगतः भक्तान् आश्रयत। संस्कृतवार्ता कक्षतः पुनीतत्रिपाठी*

-------------------------------------

**महर्षिदयानन्दस्य जन्म-जयन्ती"**

अद्य महर्षेः दयानन्द-सरस्वती वर्यस्यापि जन्म जयन्ती वर्तते। प्रधानमन्त्री श्रीनरेन्द्र मोदी अद्य महतो विचारकस्य, समाज-परिष्कारकस्य प्रखर-राष्ट्रवादिनश्च महर्षि-दयानन्द-सरस्वती-वर्यस्य जन्म जयन्त्याः पावनावसरे श्रद्धांजलीन् अर्पितवान्। प्रधानमन्त्रिणा सामाजिक-सञ्जालीये एकस्मिन् सन्देशे प्रोक्तं यत् महर्षिः दयानन्दः आजीवनं समाजे अज्ञानतां, अंधविश्वासं, आडंबरं, च विरुध्य जागरूकीकरणे निरतः आसीत्। श्रीमोदी प्रोक्तवान् यत् शिक्षा-महिला-सशक्तीकरणेन साकमेव भारतीय-रिक्थस्य संस्कृतेश्च संरक्षणस्य कृते महर्षि-दयानन्दस्य प्रयासाः देशवासिनां कृते सदैव प्रेरणा-स्रोतोभूताः भविष्यन्ति।

-------------------------------------

**क्रिकेट**

पुरुष क्रिकेट क्रीडायां, भारतेन अहमदाबाद - क्रीडांगणे इंग्लैंड-दलं विरुध्य तिसृणां स्पर्धानाम् एकदिवसीय-श्रृंखलायाः अन्तिमे द्वन्द्वे सप्त-पञ्चाश-दुत्तर त्रि-शत-मित-धावानांकानां लक्ष्यम् उपस्थापितम्।

-------------------------------------

**बैडमिंटन**

बैडमिंटन क्रीडायां चीनस्य क्लिंगदाओ मध्ये एशिया-मिश्रित-दलस्य चैम्पियनशिप इति विजेतृ-स्पर्धायाः प्रागुपान्त्यचक्रं प्राप्तम् भारतम्।

-------------------------------------

**विदेशमन्त्रालयस्य सारसंक्षेपवक्तव्यम्**

विदेश-सचिवः विक्रम-मिस्री वर्यः अद्य प्रोक्तवान् यत् प्रधानमन्त्री नरेन्द्र-मोदी फ्रांस-देशस्य राष्ट्रपतिः इमैनुएल-मैक्रों स्वीय-वार्तायाः अवसरे यूरोप-पश्चिमैशिया-भारत-प्रशान्त-क्षेत्रे भू-राजनीतिक-घटनाक्रमेषु विचाराणां आदान-प्रदानं कृतम्। मार्सिले-नगरे वार्त्ताहरेभ्यः सार-संक्षेपं प्रस्तुवता अमुना प्रोक्तं यत् वैश्विक-क्षेत्रीय-महत्तत्त्वस्य भूरि प्रकरणेषु चर्चा कृता।

-------------------------------------

**पञ्जाब-रिक्थ-महोत्सवः-**

पञ्जाबराज्यस्य समृद्धपरम्पराणां सम्मानार्थं पञ्जाबे फरवरी-मासस्य त्रयोदश दिनाङ्कादारभ्य षोडश दिनाङ्कपर्यन्तं चतुर्दिवसीयः पटियाला-रिक्थ-महोत्सवः आयोज्यते। राज्य-पर्यटन-विभागः पटियाला-मण्डल-प्रशासनेन सह समन्वयं कृत्वा एतस्य आयोजनं कुर्वन् अस्ति। महोत्सवेऽस्मिन् प्रकृति-यात्रा, रिक्थयात्रा, खाद्य-महोत्सवः, संगीतसन्ध्याः, एयरो शो इति विमान प्रदर्शनी, पुष्पप्रदर्शनम् चेत्यादयः प्रकल्पाः अपि भविष्यन्ति। ऐतिहासिक- शीश-महालये सरस-मेलकम् अपि आयोजितं भविष्यति। अत्र हि सैन्य-साहित्य-महोत्सवः अतिरिक्तं आकर्षणं भविष्यति।

-------------------------------------

**विश्वस्वास्थ्यसङ्घनं-बर्डफ्लू**

WHO इति विश्वस्वास्थ्यसङ्घटनेन उक्तं यत् बर्डफ्लू इत्यस्य रोगस्य प्रकोपस्य विषये अमेरिका-देशेन सह संवादः कठिनः जातः। अस्य कारणम् अस्ति अमेरिका-देशस्य स्वास्थ्य-संघटनात् निवृत्तिः । डब्ल्यू.एच.ओ-संस्थायाः प्रवक्ता क्रिश्चियन लिण्ड्मेयरः जिनेवा-नगरे वार्ताहर-सम्मेलने एतत् सर्वं प्रत्यपादयत्। अमेरिकादेशे एच् पञ्च, एन् एकम् बर्डफ्लू- इत्यस्य रोगस्य प्रकोपेण सम्प्रति प्रायः सप्तति-मिताः अमेरिकीयकृषिकर्मकराः संक्रमिताः सन्ति ।

-------------------------------------

**मुंबई- रिज़र्व-बैंकम्**

भारतीय रिजर्व बैंकमिति वित्त-कोषेण सर्वाण्यपि सम्बद्धानि बैंकानि परामृष्टानि सन्ति यत् तानि सर्वकारीय-कार्य-व्यवसाय-सम्पादनार्थं स्वीय-सर्वाः शाखाः ऐषमो मार्च-मासस्य एक-त्रिंश्यां यावत् उद्घाटयेयुः।

**।। इति वार्ताः।।**